# Shri Kalabhairava Stotram

# श्रीकालभैरवस्तोत्रम्

## Document Information

Text title : kAlabhairavastotram

File name : kAlabhairavastotram.itx

Category : devii, devI

Location : doc_devii

Proofread by : NA

Latest update : January 27, 2019, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

July 5, 2021

*sanskritdocuments.org*

# श्रीकालभैरवस्तोत्रम्

श्रीगणेशाय नमः ।
देवाः उचुः ।
नमो भैरवदेवाय नित्ययानन्दमूर्तये ।
विधिशास्त्रान्तमार्गाय वेदशास्त्रार्थदर्शिने ॥ १॥

दिगम्बराय कालाय नमः खट्वाङ्गधारिणे ।
विभूतिविलसद्भालनेत्रायार्धेन्दुमालने ॥ २॥

कुमारप्रभवे तुभ्यं बटुकायमहात्मने ।
नमोऽचिन्त्यप्रभावाय त्रिशूलायुधधारिणे ॥ ३॥

नमः खड्गमहाधारहृत त्रैलोक्यभीतये ।
पूरितविश्वविश्वाय विश्वपालाय ते नमः ॥ ४॥

भूतावासाय भूताय भूतानां पतये नम ।
अष्टमूर्ते नमस्तुभ्यं कालकालाय ते नमः ॥ ५॥

कं कालायातिघोराय क्षेत्रपालाय कामिने ।
कलाकाष्टादिरूपाय कालाय क्षेत्रवासिने ॥ ६॥

नमः क्षेत्रजिते तुभ्यं विराजे ज्ञानशालने ।
विद्यानां गुरवे तुभ्यं विधिनां पतये नमः ॥ ७॥

नमः प्रपञ्चदोर्दण्ड दैत्यदर्पविनाशने ।
निजभक्त जनोद्दाम हर्षप्रवरदायिने ॥ ८॥

नमो जम्भारिमुख्याय नामैश्वर्याष्टदायिने ।
अनन्तदुःखसंसारपारावारान्तदर्शिने ॥ ९॥

नमो जम्भाय मोहाय द्वेषायोच्याटकारिणे ।
वशङ्कराय राजन्यमौलन्यस्त निजान्घ्रये ॥ १०॥

नमो भक्तापदां हन्त्रे स्मृतिमात्रार्थदर्शिने ।
आनन्दमूर्तये तुभ्यं श्मशाननिलयाय ते ॥ ११॥

वेतालभूतकूष्माण्ड ग्रहसेवाविलासिने ।
दिगम्बराय महते पिशाचाकृतिशालने ॥ १२॥

नमोब्रह्मादिभिर्वन्द्य पदरेणुवरायुषे ।
ब्रह्मादिग्रासदक्षाय निःफलाय नमो नमः ॥ १३॥

नमः काशीनिवासाय नमो दण्डकवासिने ।
नमोऽनन्त प्रबोधाय भैरवाय नमोनमः ॥ १४॥

इति श्रीकालभैरवस्तोत्रं सम्पूर्णम् ।

*Shri Kalabhairava Stotram*

pdf was typeset on July 5, 2021

Please send corrections to *sanskrit@cheerful.com*